सत्यमेव जयते

आज़ादी का अमृत महोत्सव

# सामान्यानां विपर्ययानां विषये करणीयाः अकरणीयाश्च सन्दर्भाः

## Sanskrit




nidm

स्थितिस्थापकं भारतम् - विपन्मुक्तं भारतम्

राष्ट्रिय - विपद् - व्यवस्थापन - संस्थानम्

(गृहमन्त्रालयः, भारतसर्वकारः)

प्लट् संख्या १५, ब्लॅक् बी, पकेट् ३, सेक्टर् २९, रोहिनी, देहली - ११००४२

दूरभाषसंख्या : ०११ - २०८७३४१२  अन्तर्जालसङ्केतः - https://nidm.gov.in

# भारतस्य असुरक्षायाः स्थितिः

भारते बहुविधाः विपत्तयः सन्ति, तत्र काश्चन प्राकृतिकाः, अन्याश्च मानवसृष्टाः सन्ति, याः भारतस्य अनन्याभिः भू-जलवायुपरिस्थितिभिः आर्थिक-सामाजिकपरिस्थितिभिश्च प्रभाविताः भवन्ति। भारतस्य राज्यानि केन्द्रशासितप्रान्तानि च आहृत्य साकल्येन पञ्चत्रिंशत् (३५) प्रदेशेषु प्रायः सप्तविंशतिः (२७) प्रदेशानि विपद्ग्रस्तानि सन्ति। भारतभूमिभागस्य प्रायः अष्टपञ्चाशत-दशक-षट् (५८.६) प्रतिशतं भागः सामान्यात् अतिमात्रपर्यन्तया भूमिकम्पया प्रभावितोऽस्ति। किञ्च, चत्वारिंशत् (४०) मिलियन् हेक्टर-भागः (भूमेः प्रायः द्वादश-प्रतिशतं भागः) प्लावनेन नदीक्षारणेन च ग्रस्तोऽस्ति, षोडशोत्तर-पञ्चसप्ततिशतमं (७५१६) किलोमिटार्-प्रान्तेषु विस्तृतेषु तटप्रदेशेषु प्रायः सप्तपञ्चाशत्-शततमः किलोमिटर्-परिमितः भागः भीषणेन चक्रवातेन, सामुद्रिकेन प्लावनेन च प्रभावितोऽस्ति, अपि च अष्टषष्टि-प्रतिशतं (६८%) कर्षणभूमिः क्षराग्रस्ता, पर्वतीयाः प्रदेशाश्च भूमिस्खलनेन हिमशैलप्रकोपेन च ग्रस्ताः सन्ति।

### भारतस्य विपन्मानचित्रम्

भारतं विश्वस्य दशसु सर्वाधिकेषु विपर्ययग्रस्तेषु देशेषु अन्यतममस्ति। अस्माकं देशः विविधैः कारणैः विपर्ययग्रस्तोऽस्ति, यानि च कारणानि प्राकृतिकानि मनुष्यकृतानि च सन्ति। तानि कारणानि तावत् - प्रतिकूलाः भू-जलवायु-परिस्थितयः, स्थलाकृतेः वैशिष्टानि, पर्यावरणीयानि अवक्षयानि, जनसंख्यावृद्धिः, नागरिकीकरणम्, अवैज्ञानिकाः विकासाभ्यासाः इत्यादीनि। भारतस्य चत्वारः विशिष्टाः प्रदेशाः - हिमालयप्रदेशः, जलोढभूमिः, दाक्षिणात्यप्रान्तस्य पर्वतीयः भागः, तटप्रान्तः - इत्येतेषां स्वकीयाः विशिष्टाश्च समस्याः सन्ति।

- हिमालयप्रदेशः बहुविधैः भूकम्पीयैः क्रियाकलापैः ग्रस्तोऽस्ति। यतो ह्यस्माकं प्रायः सर्वाः एव नद्यः हिमालयप्रदेशादेव आगच्छन्ति, ताश्च नद्यः ताभिः सह नैकानि अवसादनानि आनयन्ति, अतोऽयं प्रदेशः नदीवाहितानाम् अवसादनानां स्तूपीकरणेन प्रभावितो भवति, येन चाग्रे प्रायशः प्लावनानि दृश्यन्ते।

- देशस्य पश्चिमभागः क्षरायाः परिस्थित्या बहुधा क्षतिग्रस्तोऽस्ति। तापमात्रायाः अस्वाभाविकेन परिवर्तनेन, समुद्रोपरि भारमात्रायाः प्रभावेन च तटप्रान्तेषु नैकशाः चक्रवाताः दृश्यन्ते। समुद्रस्य अन्तः जायमानैः भू-विवर्तैः इमे तटप्रान्ताः सामुद्रिकैः घूर्णिवातैः अपि प्रभाविताः भवन्ति। सम्पूर्णे संवत्सरे उभयत्र आरबमहासागरे बङ्गोपसागरे च प्रसृतात् तटप्रान्तात् भारतं प्रायः पञ्चशः षट्-प्रकारकान् चक्रवातान् परिलक्षति।

- विविधाः मानवसृष्टाः क्रियाकलापाः, यथा - जलसंख्यीया विवृद्धिः, क्रमशः क्षीयमाणा पर्यावरणीया परिस्थितिः, वनप्रदेशह्रासः, अवैज्ञानिकः विकासः, क्षयशालिनः कर्षकाभ्यासाः, आत्यन्तिकम् उत्पादनम्, अपरिकल्पितं नागरिकीकरणम् प्रभृतयोऽपि तथैव क्षतीनां प्रवर्धनाय, विपदां पौनःपुन्येन सम्पन्नतायै च उत्तरदायिनः सन्ति।

# भारतस्य विपर्यय - प्रबन्धन - संरचना - विधिः

भारतस्य विपर्यय-व्यवस्थापनस्य सांगठनिकी संरचना सम्प्रति संक्रमणस्तरेऽस्ति। विपर्यय-प्रबन्धन- अधिनियमः, २००५ इत्यस्य कार्यान्वयनानुगुणं नवीनः विन्यासः विकसितोऽस्ति। पूर्वसंरचनापि समकालमेव प्रवर्तमानोऽस्ति। तदनुसारेण केन्द्रस्तरे राष्ट्रिय-विपर्यय-प्रबन्धन-प्राधिकरणं प्रतिष्ठापितम्। एवमेव राज्यस्तरे प्रदेशस्तरे च राज्य-विपर्यय-प्रबन्धन-प्राधिकरणं निर्मितम्।

## विपर्यय - प्रबन्धन - अधिनियमः, २००५


भारते विपर्यय-प्रबन्धनस्य कार्यान्वयनस्य निर्माणाय निरीक्षणाय च अपेक्षिताः सांगठनिक्यः संरचनाः प्रतिष्ठापयितुं निर्मितोऽयम् अधिनियमः। अपि चायम् अधिनियमः सर्वकारस्य विविधैः विभागैः विपर्ययानां प्रतिरोधाय निवारणाय च, कस्यांश्चित् परिस्थितौ कथं व्यवहर्तव्यम् इत्यादीनां च विषये विविधानां नीतिनां क्रियान्वयनाय सहायको भवति।

## राष्ट्रीय - विपद् - प्रबन्धन - नीतिः (२००९)

विपर्ययानां प्रबन्धनाय निर्मितस्याः अस्याः राष्ट्रीयनीतेः विशिष्टानि वैशिष्ट्यानि तावत् -

- विपर्ययानां निवारणाय, शमनाय, सज्जतायै च अपेक्षिताः सामग्रिकाः सक्रियाश्च उपायाः विपद्-प्रबन्धनाय स्वीकरिष्यन्ते।
- प्रत्येकं मन्त्रालयः/केन्द्रसर्वकारीयः विभागः/राज्यसर्वकारीयः विभागः अवश्यमेव एकां पर्याप्तां धनराशिं संरक्षिष्यन्ति विपर्ययानां शमीकरणाय, तदर्थं प्रस्तुतये च अपेक्षिताः योजनाः/संरचनाः परिकल्पयितुम्।
- यदा तत्र पर्याप्ताः परियोजनाः भवन्ति, तदा निवारणार्थाः परियोजनाः अग्राधिकारिण्यः भवेयुः। निवाणार्थाः सङ्कल्पाः प्रवर्तिताभिः योजनाभिः कार्यक्रमैर्वा सह कार्यान्विताः स्युः।
- दुर्घटनाप्रवणेषु परिसरेषु निवारणम् इत्येषा एका अन्यतमा आवश्यकी परियोजना स्यात्। परोयोजनायाः प्रतिवेदने इदम् अवश्यं तिष्ठेत् यद् विपदां न्यूनीकरणाय एषा परियोजना कथं सहायिकी भवति इति।
- दुर्घटनायाः परिहाराय निवारणाय वा व्यापारिकसंस्थाभिः, असर्वकारीयसंगठनैः, प्रसारमाध्यमैश्च सह राष्ट्रीयप्रयासेन घनिष्ठता वर्धनीया।
- सांगठनिकी संरचना, समुचितः शृङ्खलोपदेशो वा निर्मेयः। एतेन सह दुर्घटनायाः परिरक्षकैः सह विविधेषु पर्यायेषु यथोपयुक्तं प्रशिक्षणमपि अपेक्षितं येन समन्विता त्वरिता च प्रतिक्रिया प्राप्येत।
- क्षमता-निर्माणोपायानां विविधेषु स्तरेषु परिकल्पनायाः सज्जतायाश्च एका संस्कृतिः अन्तर्भावनीया।
- राज्यस्तरे जिलास्तरे च मानक-परिचालन-प्रक्रियाः विपन्नियन्त्रण-परिकल्पनाश्च सम्बद्धैः केन्द्रीयसर्वकीयैः विभागैः विशिष्टानां विपदां निवारणाय संयोजनीयाः।
- सम्बद्धेषु भारतीयेषु मानकेषु प्रयोजनानुसारं निर्माणविन्यासाः अवश्यमेव योजनीयाः।
- भूकम्पसंलग्नेषु ३, ४, ५ परिसरेषु सर्वाणि जीवनप्रदानि भवनानि यथा - चिकित्सालयाः, रेलस्थानकानि, विमानस्थानकानि, विमान-परिचालक-केन्द्राणि, अग्निशामकभवनानि, लोकयानस्थानानि, प्रमुखानि प्राशासनिक-केन्द्राणि च रक्षणीयानि, तत्रत्याः जनाश्च बहिः निष्कासनीयानि।
- सर्वेषु राज्येषु वर्तमानाः रक्षणविधयः अवश्यमेव परिवर्तनीयाः येन ते विधयः दुर्घटनायाः परिचालनौषधीभूय निवारणेन संरचनया च सह परिकल्पितानां पद्धतीनां संगठनीकरणाय सहायिकाः स्युः।
- समुदायानां सहाभागित्वेन सह जागरुकतायाः विस्तारोऽपि अपेक्षते येन दुर्घटनाग्रस्ताः जनाः, विशेषतः स्त्रियः शिशवश्च सुरक्षिताः स्युः, विपन्निर्मूलीकरणं च सुस्थिता स्यात्।

# भूकम्पः




## पूर्वं तस्मिन् काले च

- यदि शक्यम्, प्रशिक्षितैः अभियान्त्रिकैः सह परामर्शं कृत्वा नूतनानि भवनानि भूकम्पप्रतिरोधाय समर्थानि यथा स्युः तथा निर्मान्तु।
- एकां पारिवारिकीं दुर्घटनानिवारणप्रक्रियां निर्मान्तु, यत्र -
  - आपत्कालिकी व्यवस्था स्यात्, येन अन्ततो गत्वा त्रीन् दिवसान् यावत् भवन्तः स्वनिर्भराः स्थातुम् अर्हन्ति। एतन्मध्ये - पर्याप्तं पेयजलम्, शुष्कं भोजनम्, सामान्यानि औषधानि, स्यानेटरि-प्याड्, शिशुभोज्यम् इत्यादीनि अवश्यं भवेयुः।
  - कानिचन सुरक्षितस्थानानि निर्वाचितानि स्युः, यानि उन्मुक्तानि सन्ति, सारल्येन सहजतया च प्राप्तुं शक्यन्ते।
- विद्यालयस्य विद्यार्थिभिः सह प्रायशः इमान् अभ्यासान् कुर्वन्तु।
- पतनशीलेभ्यः वस्तुभ्यः अवश्यमेव अधिकतया ध्यानं देयम् अस्ति, येन आलोडनकाले तेषां वस्तूनां पतनेन कोऽपि आहतो न भूयात्।
- भूकम्पकाले मनः स्थिरं स्थापयतु। यदि अन्तः अस्ति, तर्हि अन्तः एव भवतु। अधो गच्छतु, आच्छादयतु, स्वीकृत्य तिष्ठतु च! दृढानां वस्तूनाम् अधो गच्छतु। स्वस्य शिरः उपरितनं देहञ्च आच्छादयतु। आदर्शात् वातायनाच्च दूरं तिष्ठतु। आवलोडनकाले भवनात् बहिः मा आगच्छतु। उन्नयनयन्त्रं (लिफ्ट्) तस्मिन् काले मा व्यवहरतु।
- यदि गृहाद् बहिः अस्ति, तर्हि उन्मुक्तं स्थानं गच्छतु यस्मात् परितः उन्नतं किमपि यथा - भवनम्, सेतुः, वृक्षाः, उन्नताः विद्युत्परिवाहिका च न सन्ति।

### अनन्तरम्

- सावधानपूर्वकं सञ्चरतु। सर्वाणि अस्थिराणि विपत्सङ्कुलानि च वस्तूनि स्वस्मात् सकाशात् दूरं स्थापयतु।
- किमपि क्षतं जातं चेत् तस्य परिचर्यां करोतु। अन्येषामपि अपेक्षितानां साहाय्यं करोतु।
- चालनात् प्राक् गृहे कार्यालये च विद्युत्प्रवाहः सम्यक्तया अस्ति न वेति परीक्षताम्।
- सावधानम्, विद्युत्प्रकोपः भवितुम् अर्हति।
- क्षतिग्रस्तेभ्यः भवनेभ्यः बहिः तिष्ठतु।
- यदि भूकम्पः निमेषद्वयाद् अधिककालं यावत् जातं स्यात्, तर्हि कम्पनात् परं सर्वं सम्यक्तया परिलक्षयतु।
- आपत्कालीनं तथ्यं प्राप्तुम्, अपेक्षितान् सुरक्षानियमांश्च श्रोतुं वेतारयन्त्रम्, स्थानीयं दूरदर्शनप्रसारणं च पश्यतु।

# जलप्लावनम्



## पूर्वं तस्मिन् काले च

- निकटवर्तिनं स्थानकम्, उन्नतस्थानकम्, परिकल्पतस्थानकं वा प्राप्तुं सर्वाधिकः सुरक्षितः मार्गः कोऽस्ति सर्वे परिवारस्थाः जनाः जानीयुः।
- पूर्वसूचनायै आदेशप्राप्तये च भवतां वेतारयन्त्रं / स्थानीयं दूरदर्शनप्रसारणं च समीकरोतु।
- आपत्कालीनानि उपकरणानि सिद्धानि स्युः, यत्र मौलिकानि औषधानि, स्यानिटरि प्याड्, शिशुभोज्यम्, गुरुत्वपूर्णाः प्रलेखाश्च स्युः।
- शुष्कं भोजनम्, पेयजलम्, वस्त्राणि च सज्जीकृत्य स्थापयतु।
- उष्णं जलं पातुं प्रयतताम्। स्वस्य भोजनं पिधाय स्थापयतु। गुरुभोजनं मा गृह्णातु।
- द्वारं उन्मुक्तस्थानं च परितः जलप्रवेशं रोद्धुं बालुकायाः स्यूतानि स्थापयतु। अपि च, यदि जलं तथा वर्धेत तर्हि वातायनमपि रुध्यात्।
- शिशवः गर्भिण्यश्च कदापि बुभुक्षिताः मा स्युः।
- सर्पदंशात् सावधानाः तिष्ठेयुः, यतो ह्ययं सर्पदंशः जलप्लावने सामान्यः विषयः एव।

## अनन्तरम्

- जलरुद्धे स्यूते उष्णानि वस्त्राणि, अपेक्षितानि औषधानि, मूल्यानि वैयक्तिकानि प्रपत्राणि च स्थापयतु। इदं स्यूतम् आपत्कालीनैः उपकरणैः सहैव स्थापनीयम्।
- उन्नतं स्थानकं गच्छतु। भवतः/भवत्याः वस्त्राणि बहुमूल्यानि प्रपत्राणि च यथा सिक्तानि न स्युः तदर्थं तानि शय्यायाः उत्पीठिकायाश्च उपरि स्थापयतु।
- मुख्यां विद्यात्प्रवाहिकां पिधातु। यानि वैद्युतिकानि यन्त्राणि जलसिक्तानि जातानि तानि मा व्यवहरतु।
- यत्र भवान्/भवती न जानाति यत् जलं कियत् गभीरम् अस्ति, जलमध्ये विद्युत्प्रवाहः अस्ति न वेति, तत्र मा अवतरतु।
- जलप्लावितस्थानकस्य निकटे शिशूनां क्रीडां मा अनुमिनोतु।

# चक्रवातः



## पूर्वं तस्मिन् काले च

- वेतारयन्त्रे दूरदर्शने च प्रसारितान् जलवायुसंवादान् शृणोतु।
- भवतां परिसरे सुरक्षितम् आवासस्थानं कुत्रास्तीति निर्णयतु।
- आपत्कालीनोपकरणानि स्वपार्श्वे स्थापयतु यत्र अपेक्षितानि मौलिकभोजनानि, औषधानि, विद्युत्कोषाश्च भवेयुः।
- द्वाराणि, वातायनानि, छदः, भित्तिकाश्च चक्रवातकालस्य आगमनात् प्राक् परिमार्जिताः परिवर्तिताः वा स्युः। पर्याप्तानि भोजनानि, पेयजलं च सुरक्षितेषु स्थानेषु स्थापयतु।
- विद्युदभावकाले व्यवहाराय आलोकानि, वर्तिकाः, म्याच् पेटिकाः च स्थापयतु।
- समुद्रे भ्रमणाय मा गच्छतु।
- यावता चक्रवातः अतीतः इति निर्देशः न प्राप्तः, तावता गृहस्य अन्तः एव तिष्ठतु।
- वृक्षाणां निकटे, गुरुभारयुक्तानां निर्माणानां यथा सेतूनां समीपे आश्रयं मा गृह्णातु।
- प्रत्येकं सन्तानस्य नामानि, आवाससङ्केतम्, दूरभाषसंख्यां च एकस्मिन् पत्रे विलिख्य प्रत्येकं सन्तानस्य स्यूते स्थापयतु।
- यदि भवान्/भवती बहिः अस्ति तर्हि कतिपयेभ्यः वस्तुभ्यः सावधानाः तिष्ठतु, यथा - उड्डीयमानानि वस्तूनि, पतन्तः वृक्षाः, भङ्गुराणि भवनानि, क्षतिग्रस्ताः विद्युद्रेखाः च।
- यदि भवान् कार्-याने अस्ति, तर्हि चक्रवातकाले गुरुवर्षणकाले वा कदापि यानं मा चालयतु। यदि कदाचित् यानस्य गमनं चक्रवातेन विपन्नं स्यात्, तर्हि भवतः/भवत्याः जीवनहानिरपि भवितुमर्हति। अस्यां परिस्थितौ कस्मिंश्चित् सुरक्षिते परिसरे यानं संस्थाप्य अपेक्षां करोतु।
- निष्कासनाय यथा सौकर्यं स्यात् तदर्थं स्वस्य कृते स्वसमुदायानां च कृते मौखिकम् अभ्यासं करोतु।

## अनन्तरम्

- वायोः स्थगनात् परमपि आश्रयस्थानस्य त्यागात् प्राक् सार्धैकहोरां यावत् प्रतीक्ष्यताम्।
- तावता बहिः मागच्छतु यावता इदं सुरक्षितम् अस्ति इति आधिकारिकी सूचना न प्राप्ता। यदि निष्कासनं जातं तर्हि यावता न सूच्यते तावता मा गच्छतु।
- परीक्षणम् अकृत्वा विद्युत्स्थानकं मा स्पृशतु।
- स्वगृहं प्रत्यागन्तुम् अनुशंसितं मार्गम् अनुसरतु। त्वरां मा करोतु।
- पतिताभ्यः विद्युद्रेखाभ्यः, भूमौ पतितेभ्यः वृक्षेभ्यः, विध्वस्तेभ्यः मार्गेभ्यः गृहेभ्यश्च

# अग्निसंयोगः




## किं करणीयम् ?

- स्वस्य गृहस्य परीक्षणं करोतु येन अग्निसंयोगो न भवेत्। शिथिलः विद्युत्सम्पर्कोऽस्ति न वेति परीक्ष्यताम्। शिथिलस्य विद्युत्कोषस्य समीपे ज्वलनशीलानि वस्तूनि मा स्थापयतु।
- अग्निसंयोगो जातश्चेत् १०१ मध्ये सम्पर्कं करोतु।
- यदि गृहमध्ये बद्धो जातः, तर्हि भूमेः समीपे आगत्य उपविशतु। गृहे धूमः प्रविशन् अस्ति चेत् तत्प्रवेशम् अवरुन्ध्यात्। बहिर्गमनाय प्रयासं करोतु। मुखे सिक्तं वस्त्रम् आलोप्य श्वासं स्वीकरोतु। निर्गमस्य द्वौ मार्गौ अन्विषतु, अपि च इदं निश्चिनुयात् यत् तौ मार्गौ अवरोधमुक्तौ स्तः इति।
- शान्तो भवतु। सर्वाणां वैद्युतिकोपकरणानां विद्युत्संयोगं छिनत्तु। बहिर्गमनात् परं कस्मिंश्चित् सुरक्षिते स्थाने तिष्ठतु।
- जलकुपीः ब्लॅकेट् च सज्जीकृत्य स्थापयतु। अग्निशामकं यन्त्रं सज्जीकरोतु, यथाकालं च तत् पूरयतु।
- यदि वस्त्रे अग्निसंयोगो जातः, तर्हि तिष्ठतु, क्षिपतु, तानि चावर्तयतु। अस्य अभ्यासं प्राक् कृत्वा सिद्धो भवतु।
- यदि अग्निसंयोगः अनियन्त्रितो जातः, तर्हि तं जनं ब्लॅकेट्-द्वारा आच्छादयतु यावता अग्निः पिहितो न जातः।

## किं न करणीयम् ?

- जनसम्मर्देषु, जनबहुलेषु च स्थानेषु, सङ्कीर्णेषु परिसरेषु, गृहमध्ये वा कदापि अग्निस्फोटं मा ज्वलयतु।
- कदापि अधिकः शब्दो भवतु इति धिया अग्निस्फोटं टिन्-निमितया काचनिर्मितया वा पेटिकया मा आच्छादयतु।
- प्रदीर्घानि शिथिलानि च वस्त्राणि मा धरतु, यतो हि तानि त्वरितम् अग्निसंयुक्तानि भवन्ति।
- प्रज्वलितं धूम्रपानपूटं (सिगारेट्) मा क्षिपतु, क्षेपणात्परं पद्भ्यां तत्रस्थम् अग्निं निर्वापयतु।
- वस्त्रे अग्निसंयोगो जातश्चेत् तत् झटिति मा निष्कासयतु। (सारल्येन भवति चेत् निष्कासयितुं शक्यते।)
- क्षतस्थानेषु आसञ्जनवस्त्राणि मा योजयतु।

# भूस्खलनम्




## पूर्वं तस्मिन् काले च

- तीक्ष्णे पर्वतीये भागे, पर्वतप्रान्तानां समीपे, नदीमार्गे अत्यन्तं समीपे, स्वाभाविकायाः क्षरणशीलायाः उपत्यकायाश्च पार्श्वे गृहं मा निर्मातु।
- भवतां गृहपार्श्वे भूमिः कीदृशी अस्तीति विषये जानतु। भूस्खलनप्रवणं स्थानं परित्यजतु।
- कर्दमाक्ते परिसरे तथा प्रवाहस्थानं निर्मातु येन जलं तेन मार्गेण अग्रे गच्छेत्।
- सावधानाः जागरुकाश्च भवतु। शान्तो तिष्ठतु, वृथा आतङ्कितो मा भवतु। मिलित्वा तिष्ठतु।
- समीपस्थे मण्डलीये जिलास्तरीये वा मुख्यालये अधिकारिणं सूचयतु।
- वृक्षरोपणं करोतु, शिलाखण्डेन च आच्छादयतु येन भूमिः क्षरिता न स्यात्।
- कश्चित् अस्वाभाविकः ध्वनिः श्रूयते चेत् सावधानो भवतु, यथा - शिलाखण्डानां चलनम्, वृक्षच्छेदध्वनिः, शिलानां परस्परम् आघातः इत्यादिः।
- भूस्खलनप्रदेशात् शिलास्खलनप्रवणात् स्थानाच्च यथाशीघ्रं सम्भवेत् दूरं गच्छतु।
- नद्याः उपत्यकां, निम्नवर्तिनं स्थानं च परित्यजतु।
- यदि भवान्/भवती कस्याश्चित् नद्याः पार्श्वे अस्ति, तर्हि जलप्रवाहस्य अकस्मात् वर्धनेन न्यूनीभवनेन वा सतर्कितो भवतु, किञ्च जलं स्वच्छात् कर्दमाक्तं भवति न वेति परिशीलयतु। इदं हि समीपस्थे स्थाने जलप्लावः भूस्खलनं वा भवतीत्यस्य परिचायकम् अस्ति।
- यदा सर्वं पुनः साधारणं भवति, तदा पुनः प्रत्यागच्छतु।

## अनन्तरम्

- यदि निष्कासाय भवते उच्यते, तर्हि निर्दिष्टं सार्वजनिकम् आश्रयस्थानं गच्छतु।
- भूस्खलनस्थानात् दूरं तिष्ठतु यतो हि तत्र इतोऽधिकं भूस्खलनमपि भवितुम् अर्हति।
- भूस्खलनस्थाने प्रवेशं विना तत्र कोऽपि बद्धः आहतो वा जनोऽस्ति न वेति परीक्षतु। यदि कश्चित् तथा बद्धोऽस्ति तर्हि तस्य विषये निष्कासनप्राधिकारिणः सूचयतु।
- प्राथमिकीं चिकित्सां विना आहतं जनं नीत्वा अन्यत्र मा गच्छति, यदि च महान् सङ्कटः उपस्थितोऽस्ति।
- नद्याः कूपाद्वा कलुषितं जलं मा पिबतु।

# अनावृष्टिः



## पूर्वं तस्मिन् काले च

- व्यवहृतमपि जलं कदापि मा वृथा क्षिपतु। तेन जलेन गृहं परिस्करतु, गृहस्थेभ्यः वृक्षेभ्यो वा प्रददातु।
- वाशर्स् परिवर्त्य जलं पतन्तं नलं समीकरोतु।
- सर्वाः जलनालीः परीक्षतु येन ततः जलं न बहिर्गच्छेत्, यदि तथा भवति तर्हि तां नालिं समीकरोतु।
- तथाविधानि उपकरणानि व्यवहरतु यानि अधिकम् ऊर्जां जलं च न स्वीकुर्वन्ति।
- क्षरा-सहिष्णुन् वृक्षान्, तृणान् गुल्मांश्च रोपयतु (तथाविधाः वृक्षाः ये जलं न्यूनं स्वीकुर्वन्ति)।
- तथाविधानि जलसेकयन्त्राणि व्यवहरतु यत् न्यूनं जलं बहिः निष्कासयति, यथा माईक्रो-सेकः, ड्रीप्-सेकश्च।
- यत्र शक्यते तत्र वृष्टिजलेन सेचनप्रक्रियाम् उपयुञ्जीयात्।
- अनावश्यकं शौचालये जलस्य व्यवहारं मा करोतु।
- यदा भवान्/भवती दन्तमार्जनं करोति, यदा मुखं प्रक्षालयति, यदा च भवान् श्मश्रूकर्तनं करोति, तदा जलं वृथा प्रवाहं स्थगयतु। स्नानकाले शायर्-अपेक्षया कूपीं व्यवहरतु।
- यथाशक्यं शुष्कं भोजनमेव अधिकतया स्थापयतु।
- भूमेः तथा उपयोगं करोतु येन अनावृष्टिकालेऽपि सा भूमिः तां परिस्थितिं सोढुं शक्नुयात्।

# सुनामी (पारावारप्लावः)



## पूर्वं तस्मिन् काले च

- भवतां गृहं विपर्ययपूर्णे प्रदेशे अस्ति न वेति परीक्षतु।
- ये जनाः समुद्रतटे निवसन्ति ते भूकम्पम् अथवा तीव्रं भूमिस्पन्दनं वा सतर्कवार्तारूपेण स्वीकुर्वन्तु।
- यदि "सुनामी-घटिका" इति "सुनामी-सतर्कः" इतिरूपेण परिवर्त्यते, तर्हि स्वगृहात् निष्कासितुं सज्जो भवतु।
- सुनामी यथा यथा तीरप्रवेशं प्रति आगच्छति, तथा तथा तरङ्गाः मन्दीभवन्ति, ऊर्ध्वताञ्च प्राप्नुवन्ति।
- कस्मिंश्चित् उन्नते स्थाने आरोहतु। यदि न शक्यते तर्हि उन्नतगृहस्य उपरितमं तलं गत्वा आश्रयं स्वीकरोतु।
- निष्कासाय एकां परिकल्पनां निर्मातु, तदर्थञ्च युक्तां परियोजनां स्वीकरोतु। समुद्रतटाद् दूरं गच्छतु।
- वेतारयन्त्रं दूरदर्शनं वा पश्यतु तत्कालीनं तथ्यं प्राप्तुम्, किञ्च यदि निष्कासाय उच्यते तर्हि तदर्थं सिद्धो भवतु।
- विविधैः आकस्मिकैः सङ्केतचिह्नैः परिचितो भवतु, यथा - तटप्रान्तीयस्य जलस्तरस्य अकस्मात् स्फीतिः।
- यदि भवान्/भवती कामपि आधिकारिकीं सङ्केतवार्तां शृणोतु, तर्हि तत्क्षणे निष्कासितो भवतु। तदैव प्रत्यागच्छतु यदा अधिकारिणः इदं न सूचयन्ति यत् परिस्थितिः स्वाभाविकी जाता इति।
- सुनामीवशात् प्रायशः जलप्लावो भवति। इदं निश्चिनोतु यद् भवान्/भवती तदर्थं प्रस्तुतोऽस्ति इति।
- सतर्कवार्ता प्राप्ता चेत् कार्-याने पर्याप्तं तैलं पूरयित्वा स्थापयतु, येन यथाकालं यानेन सुरक्षितं स्थानं गन्तुं शक्नोति।

## अनन्तरम्

- अन्तिमकालीनं तथ्यं प्राप्तुं विद्युत्कोषचालितं वेतारयन्त्रं शृणोतु।
- आहतानाम् आबद्धानाञ्च जनानां साहाय्यं करोतु। तेभ्यः प्राथमिकीं चिकित्सां च प्रयच्छतु।
- जलप्लाविताद् विध्वस्ताच्च स्थानात् दूरं तिष्ठतु, यावता सर्वकारपक्षतः प्रत्यागमनं सुरक्षितम् अस्तीति निर्देशो न प्रदत्तः।
- सावधानं स्वगृहे प्रविशतु।
- विध्वस्तस्य गृहस्य अन्तः यदा प्रविशति तदा टर्च् (विद्युत्कोषवर्तिकां) प्रज्वाल्य प्रविशतु। क्वापि विद्युद्रेखा विच्छिन्ना जाता न वा, विद्युत्प्रकोपो जातो न वा इत्यादिकमपि परीक्षतु।
- भोज्यवस्तूनि पेयजलं च अस्ति न वेति परीक्षतु।

# तापतरङ्गः




## प्राक्

- एलूमिनियम्-फोयेल्-आच्छादितं कार्डबोर्ड्-सदृशम् अस्थायि वातायनाच्छादकं स्थापयतु येन बहिस्थः आतपः पुनः बहिः निर्गच्छेत्। एतेन प्रकोष्ठः शीतलः स्यास्यति।
- स्थानीय-वातावरणस्य पूर्वाभासं शृणोतु, तापमानानां परिवर्तनविषये जागरुकाः भवन्तु।
- भवतां परिसरे भवदात्मीयाः ये वृद्धाः, युवानः, रुग्नाः, अतिस्थूलाः वा सन्ति तेषां विषये जानन्तु। तेषां भवत्साहाय्यम् अपेक्षते।
- तापग्रस्तानां जनानां परिचर्या कथं करणीया इति विषये प्राथमिकीं चिकित्सां जानन्तु।
- छायाप्राप्तये वृक्षान् रोपयन्तु।

## तस्मिन् काले

- शिशुं पालितं वा बद्धे कारयाने, साक्षात् सूर्यालोके वा प्रदीर्घकालाय मा स्थापयतु।
- यावत् शक्यं गृहस्य अन्तः एव तिष्ठतु।
- साधु-सन्तुलितम्, लघुम्, नियतभोज्यं च भोजनं स्वीकरोतु।
- पर्याप्तं जलं पिबतु, जलतृष्णा न प्राप्ता चेदपि। सर्वदा यथायोग्यं जलं पिबन् भवतु।
- ये जनाः अपस्माररोगेण, हृद्रोगेण, वृक्क-यकृदादिरोगेण वा पीडिताः सन्ति, अथवा ये द्रव-प्रतिबन्धिताहारेण पीडिताः, वर्धमानस्य द्रवस्य सेवनात् जातया पूर्व-द्रव-धारण-समस्यया वा पीडिताः सन्ति, ते वैद्यस्य परामर्शं ग्रहीतुं शक्नुवन्ति।
- शिरस्त्राणं वस्त्रं वा धार्य मुखं शिरः च रक्षतु।

# शीततरङ्गः।



## पूर्वं तस्मिन् काले च

- परिवारस्य सदस्यानां कृते आपत्कालीनोपकरणैः सह मूलभूतानि विशिष्टानि च औषधानि, पर्याप्तानि उष्णवस्त्राणि च सज्जीकृत्य स्थापयतु।
- स्वल्पतापयुक्तं वैद्युतिकम् उष्णतायन्त्रं स्थापयतु, यद् भवान्/भवती आरात्रीं यावत् चालयितुं शक्नोति, येन प्रकोष्ठः उष्णः तिष्ठेत्।
- प्रतिसमयं महत्त्वपूर्णां सूचनां ज्ञातुं स्थानीयं वेतारस्थानकं शृणोतु।
- गृहाभ्यन्तरे तिष्ठतु, यदा शीततापः प्रबलो भवति तदा बहिः मा गच्छतु।
- यथाशक्ति आत्मानं शुष्कं स्थापयतु।
- अङ्गुलिषु, इयर्-लोब्स् मध्ये, नासिका-अग्रभागे च अनुभूति-हानिः, श्वेतवर्णः/श्वेतवर्णः इव फ्रास्ट्बैट्-इत्यस्य लक्षणानि पश्यतु।
- यदा केरोसिन्-द्वारा अङ्गारद्वारा वा चालितम् उष्णतायन्त्रं चुल्ली वा गृहे प्रज्वलति तदा पर्याप्तं वायुनिष्कासनव्यवस्थां कल्पयतु। एतेन प्रकोष्ठे विषाक्तः धूमः आबद्धो न भवति।
- नियमितरूपेण उष्णं पानीयं स्वीकरोतु।

## अनन्तरम्

- अत्यधिकं शैत्यं यदा भवति तदा, यदि भवतः गृहे विद्युत् नास्ति, यदि वा उष्णता नानुभूयते, तर्हि निर्दिष्टम् आश्रयस्थानं प्रति गच्छतु।
- एकाधिकेषु स्तरेषु उष्णवस्त्राणि परिधाय शैत्यप्रकोपात्, हाईपोथार्मिया-तश्च आत्मानं रक्षितुं प्रयन्तं करोतु।
- यदि भवान्/भवती कस्मिंश्चित् हिमप्रपातक्षेत्रे निवसति, यदि वा भवत्परिसरे हिमप्रपातस्य सतर्कता प्रदत्तास्ति, तर्हि गृहस्य अन्तः एव तिष्ठतु यावता निर्गमाय नोच्यते।

## शीतकालीनानि कारयानोपकरणानि

- (छेनिः, ब्लॅङ्केट्, कोर्ट्, आलोकः, विद्युत्कोषः, उच्चक्षमताप्रदं भोजनम्, पेयजलम्, अन्यानि उपकरणानि च)।

# महामारी



## पूर्वं तस्मिन् काले च

- कतिपयान् दिवसान् यावत् व्यवहर्तुं शक्यते तावत्परिमाणकं पेयजलं भोजनं वा स्थापयतु। दूषणं परिहर्तुम् ऊष्णीकृतं परिशोधितं वा जलं स्वीकरोतु।
- कानिचन सामान्यानि औषधानि स्वस्य पार्श्वे स्थापयतु, यथा - वेदनानिवारणस्य, उदरोपचारस्य, कफ-शीतादिप्रतिकारस्य, जरस्य, ईलेक्ट्रोलैट्-युक्तानां द्रवाणाम्, विटामिन् इत्येतेषाम् औषधानि, स्यानिटरि प्याड्, शिशुभोजनानि च।
- यदि शक्यते तर्हि आपत्कालीनायां परिस्थितौ साहाय्याय स्थानीयैः स्वयंसेवकैः सह मिलित्वा तेषां साहाय्यं करोतु।
- भवतां परिसरं स्वच्छं स्थापयतु, तत्र जलं स्थगितं न भवेदित्यपि परिलक्षतु।

### अनन्तरम्

- ये जनाः रोगिणो जाताः तेभ्यः घनिष्ठं सम्पर्कं कियत्कालात् परिहरतु। यदि शक्यते तर्हि अस्वास्थ्यकाले गृहे एव तिष्ठतु। स्वेन व्यवहृतं वस्तु अन्येन सह मा सहभागयतु। एतेन भवद्रोगेण अन्यः पार्श्विकः कोऽपि रोगाविष्टो न भविष्यति।
- यदा रुग्नो जातः, तदा अन्यस्मात् दूरं संस्थाप्य तिष्ठतु, तेन तेऽपि आक्रान्ताः न भवेयुः।
- कफकाले छेककाले वा भवतः मुखं नासिकां च वस्त्रेण आच्छादयतु।
- हस्तयोः प्रक्षालनेन (यदि शक्यते तर्हि फेनकेन) अन्ये भवतः रोगेण आक्रान्ताः न भविष्यन्ति।
- कीटाणूनां प्रसारस्य निवारणाय अकारणं भवतः चक्षुषी, नासिके, मुखं वा मा स्पृशतु।

# मेघघोषः तडित्पातश्च



## पूर्वं तस्मिन् काले च

- यदि भवान्/भवती मेघघोषं शृणोति, तर्हि अचिरादेव तडित्पातम् अनुभविष्यति।
- सतर्कवार्तां परामर्शं च प्राप्तुं स्थानीयं संवादमाध्यमं शृणोतु।
- आपातकालीनानि उपकरणानि सज्जीकरोतु यत्र अपेक्षितानि महत्त्वपूर्णानि औषधानि, अन्यानि मौलिकानि उपकरणानि च भवेत्।
- झञ्झावातस्य आगमनात् प्राक् सर्वाणि वैद्युतिकानि उपकरणानि विद्युत्स्थानकेषु विच्छेदयतु। संवादानां प्राप्तये विद्युत्कोषचालितं वेतारयन्त्रं व्यवहरतु।
- वैद्युतिकोपकरणेभ्यः तारेभ्यो वा सम्पर्कं मा स्थापयतु। अन्येभ्यः उपयोगिवस्तुभ्योऽपि दूरत्वं स्थापयतु।
- कंक्रीट्-निर्मितायां भूमौ न शयतु, कंक्रीट्-निर्मितायां भित्तिकायां पृष्ठं कृत्वा मा उपविशतु।
- वृक्षाणाम् अधः आश्रयं मा स्वीकरोतु, यतो हि ते विद्युतः उत्तमाः वाहकाः भवन्ति।
- तडित्पातकाले स्नानं मा करोतु, चलतः जलाच्च दूरं तिष्ठतु यतो हि तडित् धातवनालिकास्थितेन जलमाध्यमेनापि प्रवहितुं शक्नोति।
- यावता शक्यम्, न्यूनपरिसरे आश्रयं स्वीकरोतु। अकस्मात् जायमानात् जलप्लावनात् सतर्कितः तिष्ठतु।
- यदि नौकायाम् अस्ति, अथवा तरणं कुर्वन्नस्ति, तर्हि शीघ्रमेव स्थलम् अन्यद् आश्रयस्थानं वा प्राप्नोतु।
- झञ्झावातकाले भवतः यानमध्ये एव तिष्ठतु यावता साहाय्यं नागच्छति, झञ्झाप्रकोपो वा नापगच्छति।

## अनन्तरम्

- अद्यतनीयानां सूचनानां प्राप्तये स्थानीयं वेतारयन्त्रं दूरदर्शनं वा शृणोतु।
- शिशवः, बालक-बालिकाः, वृद्धाश्च येषां विशिष्टा सहायता अपेक्षते, तेषां साहाय्यं करोतु।
- विच्छिन्नात् विद्युत्तारात् दूरं तिष्ठतु, तेषां विषये च तत्क्षणादेव सूचयतु।
- यदि शक्यते, ये जनाः तडित्पातात् आक्रान्ताः जाताः तेभ्यः प्राथमिकीं चिकित्सां प्रददातु। तांश्च समीपस्थं चिकित्सालयं नयतु।
- इदं ध्येयं यत्, विद्युदाविष्टः जनः कथमपि तडित्प्रभावाक्रान्तो मा भवेत् इति। तेषां च परिचर्या सावधानं करणीयम्।
- तडित्पातेन पीडितानाम् आघातचिह्नानि पश्यन्तु, तदनुसारं च व्यवहरतु।

# अरण्याग्निः



**सुरक्षोपायाः**

- यत्र बहुविधानि शुष्कपत्राणि सन्ति तत्र धूम्रपानं मा करोतु, कृतं चेत् तत् ज्वलितं धूम्रपूटं (सिगारेट्/बिडी) तत्रैव मा क्षिपतु।
- व्यवहारात् परं कमपि उन्मुक्तम् अग्निं तथावस्थायां त्यक्त्वा मागच्छतु।
- अग्निसंयोगकाले कृषिकार्योपयोगिनः पशून्, चलद्वस्तूनि च सुरक्षितं स्थानं प्रति नयतु।
- अग्निदाहकाले अग्रिमसूचनायै वेतारयन्त्रं नियमितरूपेण शृणोतु। किञ्च, सुरक्षितं स्थानं प्रति गमनाय अपेक्षितान् निर्देशान् उपदेशांश्च शृणोतु।
- भवतः आत्मीयेभ्यः, मित्रेभ्यः, अन्येभ्यः सुहृद्भ्यश्च अरण्याग्नेः कारणं परिणामश्च कः इति बोधयतु। अरण्याग्नेः सुरक्षाविधिविषये जनान् जागरुकान् करोतु।
- अरण्ये यदा हठादेव अग्निसंयोगो भवति तदा भीतो मा भवतु। शान्तो भूत्वा अन्यान् जनान् प्रोत्साहयतु सावधानेन परिस्थितिं सञ्चालयितुम्।
- अरण्ये साहसिकः क्रियाकलापः कृतश्चेद्, इदम् अवश्यं निश्चिनोतु यत् कोऽपि प्रज्वलितः अग्निः तथैव मा तिष्ठेदिति (तम् अग्निं पूर्णतया पिधातु इत्यर्थः)।
- वन्योपकरणानां (पत्राणां) सविधे किमपि ज्वलत् काष्ठं मा क्षिपतु।
- अग्निदाहकाले अरण्ये मा प्रविशतु।

## राष्ट्रिय-विपर्यय-प्रबन्धन-संस्थानम्

राष्ट्रीय - विपर्यय - प्रबन्धन - संस्थानम् इत्येषा संस्था भारतस्य नवीनतमासु राष्ट्रीयसंस्थासु अन्यतमम्। इयं संस्था विपर्यय-प्रबन्धनक्षेत्रे विविधानि राष्ट्रीयदायित्वानि निर्वाहयति, यथा - मानवसंसाधनविकासः, क्षमतानिर्माणम्, प्रशिक्षणसंशोधनम्, प्रलेखनम्, नीतिसमर्थनं च। भारतस्थानां विश्वस्तरीयानां च विविधैः शैक्षणिकैः, शोधात्मकैः, तान्त्रिकैश्च संस्थानैः सह अस्य राष्ट्रीय-विपर्यय-प्रबन्धन-संस्थानस्य व्यूहात्मिका सहभागिता वर्तते। इयं संस्था ज्ञानसम्बद्धासु संस्थासु सम्पर्कं निर्मातुम्, विपर्यय-प्रबन्धनक्षेत्रे विविधानां विषयाणाम् आन्तरविषयकशोधाय प्रोत्साहयितुं च साहाय्यं करोति।

### दूरदर्शिता

- भारते विपर्ययानां प्रतिरोधाय प्रबन्धनाय च शैक्षणिकक्षेत्रे शोधक्षेत्रे च उत्कृष्टा संस्था भवितुं प्रयासः। अपि च, अस्मिन् क्षेत्रे अन्तर्राष्ट्रीये स्तरे अग्रगणीषु संस्थासु अन्ततमत्वेन मान्यताप्राप्तिः।
- सर्वेषु स्तरेषु निवारणस्य सज्जतायाश्च संस्कृतेः विकासेन प्रोत्साहनेन च विपर्ययमुक्तस्य भारतस्य निर्माणाय अविरतं प्रयासकरणम्।

### विश्वास-क्षेत्राणि

**प्रशिक्षणम्**

**साक्षाद्रूपेण** - एन्.आई.डी.एम्. वरिष्ठ-मध्यम-स्तरीयानां सर्वकारीयाधिकारिणां कृते विपर्ययानां व्यवस्थापनक्षेत्रे विविधेषु विषयेषु क्षेत्रेषु च विविधेषु विषयेषु परिसरस्य अन्तः तथा परिसराद्बहिः प्रशिक्षणस्य कार्यक्रमान् आयोजयति। मुख्यतः मुखपर्यन्तं कार्यक्रमान् अतिरिच्य, एन्. ऐ. डी. एम्. अपि मिश्रपद्धतौ प्रशिक्षणकार्यक्रमान् निर्वहति।

**जाल-आधारितं प्रशिक्षणम्** - संस्थानं विपर्ययानां प्रबन्धनसम्बद्धेषु विभिन्नेषु विशिष्टेषु विषयेषु आन्लैन्-प्रशिक्षणकार्यक्रमं निर्वहति। उपयोक्तारः पञ्जीकरणं कृत्वा आन्लैन्-अध्ययन-पोर्टल् इत्यस्य उपयोगं कर्तुं शक्नुवन्ति।

**स्वाध्याय-पाठ्यक्रमाः** - संस्थानम् अन्तर्जालाधारितान् स्वाध्याय-पाठ्यक्रमान् प्रावर्तयत्, यानि अन्यत्रभ्यः दूरस्थतया प्राप्य कस्मिंश्चित् अपि उपयोक्तुं शक्यन्ते। एते अधिकतया विपर्यानां प्रबन्धनप्रस्तावस्य विषये ज्ञानविभाजनस्य संवेदनशीलतायाः च कृते प्रयुज्यन्ते।

### पप्रकाशनानि

- पत्रिका - 'विपर्ययः विकासश्च'
- प्रकरणाध्ययनम् / अनुसंधानम्
- त्रैमासिकी पत्रिका 'टिडिंस्'
- प्रशिक्षणकार्यक्रमः
- प्रक्रियाः
- एन्.आई.डी.एम्. संस्थायाः वार्षिकं प्रतिवेदनम्

### अनुसंधानं प्रलेखनं च

एन्.आई.डी.एम्. देशे प्रमुखान् आपदान् दस्तावेजीकरणं करोति यत् तस्य उपरि पाठाः ज्ञातुं शक्नुवन्ति। प्रशिक्षणवर्गस्य अनुकरणाय प्रकरणाध्ययनस्य प्रबन्धनम् उपयोगं च कुर्वन्तु । अभ्याससंस्थानेन कार्योन्मुखा शोधपरियोजनापि भवति।

### नीत्यध्ययनम्

एनआईडीएम राष्ट्रीयस्तरीयनीतिनिर्माणे राज्यस्तरीयनीतिषु च रणनीतिः प्रदातुं सहायतां प्रददाति।

इतोऽधिकं ज्ञातुम् अस्माकम् अन्तर्जालिकं पत्रं पश्यतु। अन्तर्जालसङ्केतः - www.nidm.gov.in




एन्.आई.डी.एम्. केन्द्रम्, सेक्टर् २९, रोहिनी, देहली




एन्.आई.डी.एम्. दक्षिणकेन्द्रम्, कृष्णाजिला, आन्ध्रप्रदेशः

* उत्सः : www.ndma.gov.in